दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लषष्ठी
फाल्गुण 11 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-123 | 1 | फरवरी 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 Kangra News- 'बाथू दी लड़ी' इति ऐतिहासिकस्थलं पश्यन्तः पर्यटकाः 'मोटरबोट' विहारस्य आनन्दं गृह्णन्ति

3 हिमाचलसर्वकारः शिमलायाः हिम-सरणाङ्गणम् ('आइस स्केटिंग रिंक') इत्यस्य पुनर्निर्माणं करिष्यति;

5 अभिनव-भारती-वारङ्गा-परिसरे संस्कृति-महोत्सवस्य 'रामचरितमानस-पारायणस्य' च शुभारम्भः

## इण्डिया-ए, आई. इम्पैक्ट सम्मेलनम् भविष्यत्काले वैश्विकस्तरे कृत्रिमबुद्धेः शक्तेः उपयोगस्य दिशि एकः महत्त्वपूर्णं स्तम्भ-रूपेण सिद्धः सञ्जातः - प्रधानमन्त्री



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् इण्डिया एआई इम्पैक्ट सम्मेलनम् भविष्ये वैश्विकस्तरे कृत्रिमबुद्धेः शक्तेः उपयोगस्य दिशि एके महत्त्वपूर्ण स्तम्भ-रूपेण सिद्धः सञ्जातः। "मन की बात" इति कार्यक्रमे प्रधानमन्त्री उक्तवान् यत् अस्य सम्मेलनस्य कृते नवदिल्लीस्थ भारत-मंडपम् इत्यत्र बहूनां देशानां नेतारः, उद्योगपतयः, नवप्रवर्तकाः तथा च स्टार्टअप्-क्षेत्रे सम्बद्धाः जनाः समागताः। सममेव प्रोक्तं यत् तेन विश्वनेतृभिः तथा च प्रौद्योगिकीक्षेत्रस्य मुख्यकार्यकारी अधिकारिभिः सह मेलितुं अवसरः प्राप्तः। श्रीमोदी अवदत् यत् तेन इण्डिया ए. आई-प्रदर्शने विश्वनेतृणां समक्षे अनेकानि वस्तूनि प्रदर्शितानि। विशेषतया प्रदर्शने अमूल समवायस्य मण्डपेन तथा च सुश्रुतसंहिता इत्यनया प्रदर्शिन्या विश्वनेतारः अत्यन्तं प्रभाविताः संजाताः। तत्र प्रदर्शितं यत् कृत्रिमबुद्धिः कथं पशूनां चिकित्सायां साहाय्यं करोति तथा च कृषकाः चतुर्विंशतिः होरापर्यन्तं सर्वदा ए.आई-साहाय्येन स्वस्य दुग्धोत्पादन-क्षेत्रं पशून् च निरीक्षन्ते। श्रीमोदी इदमपि अवदत् यत् विश्वस्य विभिन्नदेशीयाः नेतारः एतत् दृष्ट्वा आश्चर्यचकिताः अभवन् यत् भारतदेशः कृत्रिमबुद्धेः साहाय्येन प्राचीनग्रन्थानां, ज्ञानस्य, पाण्डुलिपीनां च संरक्षणं करोति। सः विस्तरेण उक्तवान् यत् प्रदर्शन सुश्रुतसंहिता प्रदर्शनार्थं विशेषतया चिता आसीत्। प्रधानमन्त्री उक्तवान् यत् अस्मिन् शिखर सम्मेलने विश्वस्य जनाः कृत्रिमबुद्धेः क्षेत्रे भारतस्य अद्भुतक्षमतां द्रष्टुं अवसरं प्राप्तवन्तः। अस्मिन् अवसरे भारतदेशेन स्व-निर्मितायाः कृत्रिमबुद्धेः त्रीणि प्रारूपाणि अपि आरब्धानि। श्रीमोदी उक्तवान् यत् एतत् शिखर सम्मेलनम् अद्यावधि महानतमं ए.आई-सम्मेलनम् अस्ति। सः अस्य सम्मेलनस्य सफलतायै सर्वान् नागरिकान् अभिनन्दितवान्। विंशतिः प्रति विंशतिः क्रिकेट विश्वचषक स्पर्धायाः विषये श्रीमोदी उक्तवान् यत् अस्यां प्रतियोगितायां भारतीय-मूलस्य अनेके क्रीडकाः भागं गृह्णन्ति। तेन उक्तं यत् कनाडा-देशस्य दले भारतीय-मूलस्य क्रीडकाणां संख्या सर्वाधिकाऽस्ति। श्री मोदी अवदत् यत् भारतीयमूलस्य असंख्याः क्रीडकाः सन्ति ये स्व-स्व-देशानां नाम गौरवं च वर्धयन्ति। ते उक्तवन्तः यत् भारतीयाः यत्र कुत्रापि गच्छन्ति, तत्र स्वमातृभूम्या सह सम्बन्धं धारयन्तः तस्य देशस्य विकासे अपि योगदानं ददति। मन की बात' कार्यक्रमस्य अस्मिन् प्रकरणे नरेन्द्रमोदी केरल-राज्यस्य एकस्याः लघु-बालिकायाः आलिन-शेरिन-अब्राहम इत्यस्याः विषये उक्तवान्। सा बालिका केवलं दशमासपर्यन्तं जीवित्वा स्वजीवनं त्यक्तवती। तस्याः पितुः अरुण-अब्राहम तथा मातुः शेरिन इत्येतयोः आलिन इत्यस्याः अंगदानस्य निर्णयः अत्यन्तं प्रशंसनीयः इति प्रधानमन्त्रिणा उक्तम्। प्रधानमन्त्री अवदत् यत् राष्ट्रपतिभवने राजगोपालाचारी-उत्सवः आचरिष्यते। अस्मिन् अवसरे राष्ट्रपतिभवनस्य केन्द्रीयप्राङ्गणे सी. राजगोपालाचार्यस्य प्रतिमायाः अनावरणं भविष्यति। सी. राजगोपालाचार्यः स्वतन्त्रभारतस्य प्रथमः गवर्नर-जनरल् आसीत्। सः अवदत् यत् राष्ट्रपति-भवने राजाजी उत्सवः आयोज्यते। अस्यां शुभसन्ध्यायां राष्ट्रपतिभवनस्य केन्द्रीयप्राङ्गणे ब्रिटिश-वास्तुशिल्पिनः एडविन- लुटियन्स इत्यस्य प्रतिमास्थाने स्वतंत्रभारतस्य प्रथमः भारतीयः गवर्नर-जनरलः सी. राजगोपालाचारी इत्यस्य प्रतिमा स्थाप्यते इति सः अवदत् । श्रीमोदी तस्य प्रशंसां कुर्वन् अवदत् यत् सः तेषु महानुभावेषु आसीत् ये अधिकारं पदरूपेण न, अपि तु सेवारूपेण अपश्यन्। सः एतदपि उक्तवान् यत् एतत् दुर्भाग्यपूर्णम् अस्ति यत् स्वतन्त्रतायाः अनन्तरम् अपि ब्रिटिश-प्रशासकानां प्रतिमाः राष्ट्रपतिभवने स्थिताः आसन्, किन्तु भारतस्य महान्तः सुपुत्राः तत्र स्थानं न प्राप्नुवन्। डिजिटल-निगडनम् इत्यस्य विषयम् उल्लिख्य प्रधानमन्त्रिणा उक्तं यत् 'मन की बात' कार्यक्रमे एतेषां विषयाणां चर्चायाः अनन्तरं समाजे डिजिटल-निगडनम् तथा च डिजिटल-प्रपञ्चस्य विषये पर्याप्ता जागरूकता प्रसूता अस्ति।

### भारतीयकृषकाणां परिश्रमस्य फलम् अस्ति यत् अद्य भारतदेशः विश्वस्य सर्वाधिकः तण्डुल-उत्पादकः देशः जातः



प्रधानमन्त्री त्रिशूर जनपदस्य एकस्य ग्रामस्य अपि उल्लेखं कृतवान्, यत्र एकस्मिन् एव क्षेत्रे तण्डुलानां सप्तत्यधिकपञ्चशतं प्रकाराः उत्पाद्यन्ते। तेषु स्थानीयप्रकाराः, औषधीयप्रकाराः तथा अन्यराज्येभ्यः आगताः प्रकाराः अपि सन्ति। एतत् बीज-परम्परायाः संरक्षणस्य महत् अभियानम् इति सः उक्तवान् श्रीमोदी अवदत् यत् भारतीयकृषकाणां परिश्रमस्य फलम् अङ्केषु अपि दृश्यते। अद्य भारतदेशः विश्वस्य सर्वाधिकः तण्डुल-उत्पादकः देशः जातः अस्ति। भारतदेशे पञ्चदश-कोट्यधिकं परिमितं तण्डुलोत्पादनं जातमिति निश्चयेन विशिष्टः उपलब्धिः अस्ति इति प्रधानमन्त्रिणा कथितम्। अस्मिन् एव प्रकरणे प्रधानमन्त्रिणा तिरुनवायाः नाम्नि स्थले भरतप्पुझा नदी-तटप्रदेशे आचर्यमाणस्य प्राचीनस्य 'ममंगम्' नामकस्य उत्सवस्य अपि वर्णनं कृतम्। अनेकैः जनैः अयं महामाघ-महोत्सवः अथवा केरल कुम्भः इति कथ्यते। 'परीक्षायाः कृते सज्जाः कुर्वाणाः छात्राः' इत्यस्य विषये प्रधानमन्त्रिणा आशा अभिव्यक्ता यत् छात्राः पूर्णसमर्पणेन परीक्षाणां सज्जां कुर्वन्ति तथा च अवसादात् दूरं तिष्ठन्ति। सः छात्रान् स्मारितवान् यत् तेषां योग्यता केवलं अङ्कैः न मीयते। अन्ते श्रीमोदी सर्वेभ्यः रमज़ान-मासस्य शुभकामनाः अददत तथा च आगामिन्याः होली उत्सवस्य हार्दिकाः शुभेच्छाः अपि प्रकटितवान्।

### सुभाषितम्

**उत्तमो प्रार्थितो दत्ते,**
**मध्यमः प्रार्थितः पुनः।**
**याचकैर्याच्यमानोऽपि**
**दत्ते न त्वधमाधमः।।**

उत्तम श्रेणी के व्यक्तियों से यदि सहायता ली जाए तो वे तुरन्त प्रदान करते हैं और मध्यम श्रेणी के व्यक्ति पुनः फिर प्रार्थना करने पर ही स्वीकारते हैं। परन्तु निम्न श्रेणी में भी निम्नतम व्यक्ति याचकों द्वारा बारंबार याचना करने पर भी कुछ नहीं देते हैं।




### मेरठ-नगरस्य मेट्रो-सेवा तथा "नमो भारतम्" इति अभियानम् हरित-ध्वजेन आरब्धम्

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी इत्यनेन मेरठ-नगरस्य मेट्रो-सेवा तथा "नमो भारतम्" इति अभियानम् हरित ध्वजेन आरब्धम्। श्रीमोदी मेरठ-साउथ-स्थानकपर्यन्तं मेट्रो-यानस्य यात्राम् अपि अकरोत्। अस्मिन् अवसरे प्रधानमन्त्रिणा द्व्यशीति-किलोमीटर-मितस्य दैर्घ्ययुक्तस्य दिल्ली-मेरठ-नमो भारत अन्तर्-सम्पर्थ राष्ट्राय समर्पितः। तेन नमोभारतम् इत्यन्तर्गतम् (आर.आर.टी.एस) इत्यस्य अवशिष्ट-खण्डानाम् उद्घाटनम् अपि कृतम्। एतेषु खण्डेषु सराय-काले-खां तथा च न्यू-अशोक नगर इत्येतयोः मध्ये पञ्च-किलोमीटर-परिमित-दीर्घ-मार्गः, तथा दक्षिणी-मेरठ इत्यस्मात् मोदी-पुरम् पर्यन्तं एकविंशति-किलोमीटर-मितस्य दीर्घः मेट्रो-मार्गः अपि अन्तर्भवति। प्रधानमन्त्री मेरठ-साउथ-स्थानकात् मोदीपुरम्-स्थानकपर्यन्तं मेरठ-मेट्रो-सेवायाः अपि हरित-ध्वजेन प्रस्थानम् अकरोत्।

# Kangra News- 'बाथू दी लड़ी' इति ऐतिहासिकस्थलं पश्यन्तः पर्यटकाः 'मोटरबोट' विहारस्य आनन्दं गृह्णन्ति



**हिमसंस्कृतवार्ताः- काङ्गड़ा।** प्रवासि-पक्षिणाम् आगमनान्तरं अधुना पर्यटकाणां सम्मर्देन पौङ्ग-जलाशयः प्रफुल्लितः वर्तते। पौङ्ग- जलाशयस्य जले निमग्नायाः 'बाथू दी लड़ी' इत्यस्याः उपरिभागाः यदैव बहिः आगच्छन्ति, तदैव तां द्रष्टुं पर्यटकाः श्रद्धालवश्च निरन्तरं आगच्छन्ति। प्रतिदिनं विशालसंख्यायां दूरदूरतः पर्यटकाः वाहनानां माध्यमेन अत्र आगन्तुं प्रारब्धवन्तः। पाण्डवैः अज्ञातवासकाले निर्मितां एताम् ऐतिहासिकीम् 'बाथू दी लड़ीं' द्रष्टुं ये पर्यटकाः आगच्छन्ति, ते वन्यप्राणि-विभागेन सञ्चालितायां 'मोटरबोट' (नौका) इत्यस्याम् उपविश्य जलाशयस्य सौन्दर्यं पश्यन्ति। पर्यटकाः नौकया जलाशयस्य मध्ये स्थितं 'रैंसर दी गढ़ी' इति भूमि-क्षेत्रमपि (द्वीप) अवलोकयितुं गच्छन्ति।नौकाविहारं कुर्वतां पर्यटकाणां सुरक्षायाः पूर्णा व्यवस्था अस्ति। तेभ्यः सुरक्षाकवचं (सेफ्टी जैकेट) धारयितुं दीयते। वन्यप्राणिविभागेन पर्यटकाणां कृते एषा व्यवस्था कृता, या अधुना आकर्षणस्य मुख्यकेन्द्रं जाता। हिमालचप्रदेशात् अतिरिच्य अन्येभ्यः राज्येभ्यः वैदेशिकाः पर्यटकाः अपि अत्र बहुधा आगच्छन्ति। वन्यप्राणिविभागेन एकं निरीक्षणस्थानम् (चेकपोस्ट) अपि निर्मितम् अस्ति, यत्र नियुक्तः कर्मचारी पर्यटकाणां शुल्कपत्रं निर्दिशति। अनेन प्रत्येकस्य वाहनस्य प्रवासिनः च वृत्तान्तः सुरक्षितः भवति। तत्र सीसीटीवी (CCTV) यन्त्राणि अपि स्थापितानि सन्ति। शुल्कस्य धनं वन्यप्राणिविभागस्य कोशे गच्छति, मन्दिरे अर्पितं दानं च प्रशासनेन सङ्गृह्यते। स्थाने स्थाने सूचनापट्टानि (Warning boards) स्थापयित्वा पर्यटकाः अगाधजले न स्नातुम् आदिष्टाः सन्ति।

## 'बाथू दी लड़ी' इत्यस्य इतिहासः

अस्य स्थलस्य निर्माणं पाण्डवैः स्वर्गारोहणार्थं कृतम् आसीत्। अस्मिन् स्थले लघूनि मन्दिराणि, एकः कूपः, प्रवेश-निकासी-द्वाराणि च सन्ति। स्वर्गं गन्तुं निर्मिता एषा शृङ्खला (लड़ी) अधुना जीर्णा जाता अस्ति। लोककथानुसारं पाण्डवैः अस्य निर्माणं एकस्यामेव रात्रौ करणीयम् आसीत्, अतः तैः षट्-मासपर्यन्ता दीर्घा एका रात्रिः निर्मिता। यदा स्वर्गपर्यन्तं गन्तुं केवलम् सार्ध- द्वि-सोपानानि (२.५ सीढ़ियां) शिष्टानि आसन्, तदैव कस्याश्चित् तैलिन्याः (तेलिन) आक्रोशः श्रुतः। तं श्रुत्वा पाण्डवाः एतत् कार्यम् अपूर्णं त्यक्त्वा अग्रे प्रस्थिताः, सोपानानि च पतितानि।

कथ्यते यत् पौङ्ग-जलाशयस्य निर्माणात् पूर्वं अत्र द्रौपद्याः शाटिका (शॉल) पाण्डवैः क्रीडितानि पाषाणरूपीणि 'गीटिका' (गीटियां) च आसन्। बहुकालपर्यन्तं जले निमज्जनान्तरमपि अस्य स्थलस्य शिल्पकला अपरिणीता वर्तते। अन्या रुचिपूर्णा वार्ता एषा अस्ति यत् एतत् स्थलं अष्टौ मासान् यावत् जलमग्नं भवति, केवलं चतुर्मासान् यावत् बहिः दृश्यते। अस्मिन्नेव काले सहस्रशः पर्यटकाः अत्र आगच्छन्ति।

# आपदाप्रभावितेभ्यः भाटकनिमित्तं प्रदेशसर्वकारेण ८.१७ कोटिरूप्यकाणि विमुक्तानि



**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशसर्वकारेण २०२५ तमे वर्षे प्रबलवृष्ट्या प्रभावितेभ्यः तादृशेभ्यः परिवारेभ्यः येषां गृहाणि पूर्णतया नष्टानि अभवन् अथवा वासाय योग्यानि न सन्ति, तेभ्यः संबलप्रदानार्थं भाटकसहायतारूपेण ८ कोटि १७ लक्ष १० सहस्ररूप्यकाणि विमुक्तानि। राज्यसर्वकारः स्वकीयाभ्यः सम्पत्तिभ्यः प्रत्येकं प्रभावितपरिवाराय नगरीयक्षेत्रेषु (शहरी) १०,००० रूप्यकाणि तथा ग्रामीणक्षेत्रेषु ५,००० रूप्यकाणि प्रतिमासं भाटकसहायतारूपेण प्रदास्यति। सर्वकारस्य अनेन आरम्भेन ग्रामीणक्षेत्राणां २,८१७ परिवाराः तथा नगरीयक्षेत्राणां ८८ परिवाराः लाभान्विताः अभवन्। २०२५ तमे वर्षे प्राकृतिक- आपदाकारणेन सम्पूर्णप्रदेशे प्रायः १६,४८८ परिवाराः प्रभाविताः अभवन्। अस्मिन् काले २,२४६ गृहाणि पूर्णतया विनष्टानि तथा ७,८८८ गृहाणि आंशिकरूपेण क्षतिग्रस्तानि अभवन्।

राज्यसर्वकारस्य प्रवक्त्रा सूचितं यत् देशे प्रथमतया आपदाप्रभावितेभ्यः दीयमानायां प्रतिकरराशौ ऐतिहासिकी वृद्धिः कृता अस्ति। 'विशेषाश्रयसंकुलस्य' अन्तर्गतं प्रतिकरराशिः बहुगुणिता कृता। अनेन क्रमेण क्षतिग्रस्तानां गृहाणां पुनर्निर्माणाय १४१ कोटि ६१ लक्षरूप्यकाणां प्रथमांशः लाभार्थिभ्यः विमुक्तः अस्ति। सः अवदत् यत् विगतेषु त्रिषु वर्षेषु प्राकृतिक- आपदाभिः प्रदेशस्य प्रायः सर्वाणि क्षेत्राणि प्रभावितानि, येन वैयक्तिकसम्पत्तेः राजकीयसम्पत्तेः च महती हानिः अभवत्। अनुमानेन प्रदेशस्य १६,५०० कोटिरूप्यकाणां क्षतिः जाता अस्ति। २०२३ तमे वर्षे अपि राज्यसर्वकारेण स्वकीयसंसाधनैः विशेषाश्रयसंकुलं विमुक्तं येन प्रभावितानां आवाससम्बद्धाः आजीविकासम्बद्धाः च समस्याः न भवेयुः। २०२५ तमे वर्षे अपि एतं क्रमं निरन्तरं रक्षन् प्रभावितजनान् प्रति समुचिता वित्तीयसहायता प्रदीयमाना अस्ति।

# HP Rajya Sabha Election- प्रत्याशिचयने शीघ्रतां न करिष्यति काङ्ग्रेसपक्षः; एतानि नामानि चर्चायाम्




**हिमसंस्कृतवार्ताः- शिमला।** राज्यसभा-निर्वाचनार्थं विगत-अनुभवात् शिक्षां प्राप्य काङ्ग्रेसपक्षः अस्मिन्काले अतीव सावधानतया पदं न्यस्यति। अतः निर्वाचनस्य घोषणायां सत्यामपि सत्तापक्षः प्रत्याशी-घोषणायां शीघ्रतां न करोति। पक्षः प्रत्येकं सम्भावनायाम् विचारं करिष्यति। गतवारे काङ्ग्रेसविधायकानां विद्रोहानन्तरं राज्यसभायाः आसन्दः हस्तात् च्युतः अभवत्। ९ अप्रैल दिनाङ्के राज्यसभासांसदस्य इन्दुगोस्वामी महोदयायाः कार्यकालः समाप्तः भवति। बुधवासरे निर्वाचन-आयोगेन निर्वाचनकार्यक्रमः घोषितः। निर्वाचनस्य अधिसूचना २६ फरवरी दिनाङ्के भविष्यति तथा च नामाङ्कनपत्रं (Nomination) ५ मार्च दिनाङ्कपर्यन्तं पूरयितुं शक्यते। एवं नामाङ्कनार्थं अद्यापि १२ दिनानां समयः अस्ति, यस्मिन् काङ्ग्रेस- शीर्षनेतृत्वं मन्थनं करिष्यति।

## काङ्ग्रेसपक्षे एतानि नामानि चर्चायाम्

काङ्ग्रेसपक्षस्य पक्षतः केषाञ्चित् सम्भाव्यप्रत्याशिनां नामानि चर्चायां सन्ति-

१. आनन्दशर्माः- पूर्वकेन्द्रीयमन्त्री आनन्दशर्मामहोदयः प्रमुखः अधिकारी अस्ति। सः पूर्वमपि राज्यसभायै चितः आसीत्।

२. प्रतिभासिंहः- एकः पक्षः पूर्वलोकसभा-सांसदायाः तथा पूर्व-प्रदेशाध्यक्षायाः प्रतिभासिंह-महोदयायाः पक्षं प्रस्तौति।

३. धनीरामशांडिलः- सुक्खु-सर्वकारे स्वास्थ्यमन्त्री धनीरामशांडिलः अपि लोकसभासांसदः आसीत्। सः काङ्ग्रेसकार्यसमित्याः (CWC) सदस्यः अपि वर्तते। शांडिलमहोदयस्य अथवा अन्यस्य कस्यचित् मन्त्रिणः राज्यसभाप्रेषणस्य चर्चा अपि अस्ति।

४. कौलसिंहठाकुरः:- पूर्वविधानसभाध्यक्षः कौलसिंहठाकुरः अपि स्वकीयम् अधिकारं प्रस्तौति। सः अवदत् यत् यदि शीर्षनेतृत्वम् अवसरं दास्यति तर्हि सः पक्षस्य सेवायै सज्जः अस्ति।

५. सुनीलशर्मा 'बिट्टू':- मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु महोदयस्य निकटवर्ती तथा तस्य राजनैतिक-परामर्शदाता सुनीलशर्मा अपि प्रत्याशी भवितुम् अर्हति।

# पूर्वतने निर्वाचने सिंघवी-महोदयस्य पराजयः अभवत्

२०२४ तमे वर्षे यदा केन्द्रीयमन्त्री जे. पी. नड्डा महोदयस्य कार्यकालः समाप्तः अभवत्, तदा काङ्ग्रेसपक्षेण राष्ट्रियस्तरात् प्रखरः नेता अभिषेक मनु सिंघवीमहोदयः प्रत्याशीकृतः। परन्तु विधानसभायां बहुमतं सत्यपि सिंघवी-महोदयः पराजितः। तस्मिन् समये काङ्ग्रेसपक्षे ४० विधायकाः आसन्, भाजपापक्षे च २५ विधायकाः ३ निर्दलीय-विधायकाश्च आसन्। काङ्ग्रेसस्य ६ विधायकाः विद्रोहं कृत्वा भाजपापक्षस्य हर्षमहाजनमहोदयं जयिनं कृतवन्तः। ३ निर्दलीयानां साहाय्येन भाजपापक्षः सफलः अभवत्।

# 'मंडी' 500 वर्षाणाम् ऐतिहासिकधरोहरः स्मारकप्रतीक चिह्नस्य भव्यं विमोचनम्



**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदारपटेलविश्वविद्यालयेन मंडीद्वारा मंडीनगरस्य 500 वर्षाणां पूर्तयवसरे ***"मंडी- 500 वर्षों की ऐतिहासिक विरासत"*** विषये निर्मितं स्मारकप्रतीकचिह्नस्य (लोगो) भव्यं विमोचनं कृतम्। हिमाचलप्रदेशस्य महामहिम-राज्यपालस्य शिवप्रतापशुक्लवर्यस्य करकमलैः मण्ड्यां सम्पन्नम्। अस्मिन् अवसरे चंद्रशेखरठाकुरः, सदस्यः विश्वविद्यालय-कार्यकारी- परिषद् विधायकः धर्मपुरम्, आचार्यः ललितकुमार अवस्थी, कुलपतिः, शशीपालनेगी, कुलसचिवः, डॉ. राकेशकुमारशर्मा, विभागाध्यक्षः इतिहासविभागश्च उपस्थिताः आसन्।

अवसरेऽस्मिन् महामहिमः राज्यपालः मंडीनगरस्य समृद्धसांस्कृतिक- ऐतिहासिक- धार्मिक- धरोहरस्य सराहनां कुर्वन् अवदत् यत् 500 वर्षाणाम् इयम् ऐतिहासिकयात्रा प्रदेशस्य गौरवशाली अतीतस्य प्रतीकात्मिका वर्तते। तेन विश्वविद्यालयेन अस्मिन् अवसरे स्मारकचिह्नस्य निर्माणं सराहनीयमिति उक्तम्। तेनोक्तं यत् पञ्चशताब्दीनाम् इयं गौरवमयियात्रा केवलं समयस्य चरणम् अपि तु समाजस्य जीवंतपरंपरायाः लोकसंस्कृतेः, आस्थायाः विकासस्य च निरंतरधारायाः प्रतीकः वर्तते। सः मंडीनगरवासिभ्यः 500 वर्षाणाम् ऐतिहासिक- उपलब्धौ हार्दिकशुभकामनाः प्रददन् प्रदेशस्य समृद्धेः उन्नतेश्च कामना कृता।

चंद्रशेखरठाकुरवर्यः उक्तवान् यत् मंडीनगरस्य अभिधानं तस्य समृद्ध- सांस्कृतिक- धरोहरैः, प्राचीनपरंपराभिः, लोक- आस्थया च अस्ति। ***"मंडी - 500 वर्षों की ऐतिहासिक विरासत"*** इति विषये स्मारकप्रतीक चिह्नं मंडी नगरस्य ऐतिहासिकगरिमां सांस्कृतिकविविधताञ्च साकाररूपेण अभिव्यक्तीकरोति।

कुलपतिः आचार्यः ललितकुमार अवस्थी अकथयत् यत् विश्वविद्यालयः क्षेत्रीयइतिहासस्य, संस्कृतेः परंपराणां संरक्षणे, संवर्धने च प्रतिबद्धमस्ति। तेनोक्तं यत् विश्वविद्यालयद्वारा आवर्षम् एवमेव अनेके कार्यक्रमाः समायोजिता भविष्यन्ति।

चिह्नस्य अकादमिकप्रारूपनिर्माता डॉ. राकेशकुमारशर्मा अवदत् यत् प्रतीक-चिह्नस्य परिकल्पना चन्द्रशेखरठाकुरः माननीयसदस्यः विश्वविद्यालयकार्यकारीपरिषद्द्वारा कृता, माननीयः कुलपतिः आचार्यः ललितकुमार अवस्थीवर्य एतस्य निर्देशनं मार्गदर्शनं च अकरोत्। कुमारी स्वस्तिका शर्मा एतस्य कलात्मकअभिव्यक्तिं साकारम् अकरोत्। प्रतीकचिह्नमिदं मण्डीनगरस्य 500 वर्षाणां गौरवशालिपरंपरायाः सांस्कृतिकाभिधानस्य, अतीत- वर्तमान- भविष्याणाञ्च सुदृढ़सेतोः प्रतीकमस्ति।

# हिमाचलसर्वकारः शिमलायाः हिम-सरणाङ्गणम् ('आइस स्केटिंग रिंक') इत्यस्य पुनर्निर्माणं करिष्यति; २० कोटिरूप्यकैः भविष्यति कायाकल्पः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे पर्यटनक्षेत्रं प्रोत्साहयितुं राज्यसर्वकारः शिमलानगरे ब्रिटिशकालस्य हिम-सरणाङ्गणम् ('आइस स्केटिंग रिंक') इत्यस्य २०.२२ कोटिरूप्यकाणां व्ययेन पुनर्निर्माणं करिष्यति। अधिकारिणः शनिवासरे एतां सूचनां दत्तवन्तः। एशियामहाद्वीपस्य एतस्य प्राचीनतमस्य विशालतमस्य च प्राकृतिकस्य 'आइस- स्केटिंगरिङ्क' इत्यस्य स्थापना १९२० तमे वर्षे अभवत्। लक्कड-बाजारक्षेत्रे स्थितः एतद् हिम- सरणाङ्गणम् दशकेभ्यः प्रमुख- पर्यटक- आकर्षणस्य केन्द्रं वर्तते तथा च अनेन सहस्रशः उदीयमानाः 'हिमसरकाः' (आइस स्केटर्स) प्रेरिताः। सर्वकारस्य प्रवक्त्रा शनिवासरे अत्र प्रसारिते निवेदने उक्तं यत् शिमला 'आइस- स्केटिंग- रिङ्क' अधुना प्रायः २०.२२ कोटिरूप्यकाणाम् अनुमानितव्ययेन एका आधुनिक- अत्याधुनिक- सुविधारूपेण परिवर्तयिष्यते।निवेदने उक्तं यत् कुल-अनुमानितव्ययेषु २.८१ कोटिरूप्यकाणि नूतन-क्लब-हाउस-भवनस्य निर्माणे, १६.०९ कोटिरूप्यकाणि 'आइस-स्केटिंगरिङ्क' इत्यस्य आधारभूत-संरचनायाः सुदृढीकरणे, १.२१ कोटिरूप्यकाणि एकस्य भाण्डागारस्य (Store), स्मृति- चिह्न- विक्रयशालायाः (Souvenir shop) अन्य- मूलभूत- सुविधानां च कृते व्ययितानि भविष्यन्ति।



# हिमाचलप्रदेशे केंद्रीय- माध्यमिक- शिक्षाबोर्ड- सम्बद्धेषु विद्यालयेषु गन्तुं शिक्षकेषु अल्पा रुचिः, केवलं 4050 शिक्षकैः एव आवेदनं कृतम्

हिमसंस्कृतवार्ताः- शिमला।राजकीयाः वरिष्ठ-माध्यमिक-विद्यालयाः केंद्रीय माध्यमिक शिक्षा बोर्डेन सम्बद्धीकर्तुम् आरब्धस्य उपक्रमस्य अपेक्षिता प्रतिक्रिया शिक्षकैः न प्राप्ता। चयनितेषु 145 सीबीएसई विद्यालयेषु विविध- श्रेणीषु 5623 पदेषु नियुक्त्यर्थम् अद्यावधि केवलं 4050 शिक्षकैः एव अन्तर्जाल माध्यमेन - आवेदनं कृतम्।

विद्यालय-शिक्षाविभागेन 500 रुप्यकशुल्केन सह 24 फरवरी पर्यन्तं आवेदनानि आमन्त्रितानि। 600 रुप्यक- विलम्ब-शुल्केन सह 27 फरवरी पर्यन्तम् आवेदनं कर्तुं शक्यते। चयन-प्रक्रियायाः अन्तर्गतं 22 मार्च दिने स्क्रीनिंगपरीक्षा आयोजिता भविष्यति। तस्याः आधारेण मेरिटसूचीं निर्माय नूतन- शैक्षणिक- सत्रात् नियुक्तयः क्रियन्ते। प्रदेशसर्वकारेण गुणवत्तापूर्णशिक्षायाः तथा राष्ट्रीय- स्तरीयपाठ्यक्रमस्य कार्यान्वयनाय 145 वरिष्ठ-माध्यमिक-विद्यालयाः सीबीएसई- संलग्नाः कृताः। एतेषु विद्यालयेषु पीजीटी, टीजीटी, भाषा- अध्यापकाः, डीपीई इत्यादीनां विविधपदानां पूर्तिः करणीया अस्ति।शिक्षाविभागस्य सूत्रैः उक्तं यत् अनेके शिक्षकाः नूतनव्यवस्था, कार्यप्रणाली तथा परीक्षाप्रक्रियायाः विषये सन्देहे सन्ति। केचन शिक्षकाः वर्तमान- नियुक्तिस्थानात् स्थानान्तरण-सम्भावनया अपि आवेदनं न कुर्वन्ति।

**मेरिट-आधारेण भविष्यति चयनम्**

विभागीय-अधिकारिणाम् अनुसारं परीक्षा मेरिट- आधारेण भविष्यति। चयनित- शिक्षकाः विषयवरीयताम् अनुसृत्य विद्यालयेषु नियुक्ताः भविष्यन्ति। स्क्रीनिंगपरीक्षोत्तरं दस्तावेज- सत्यापनं तथा परामर्शप्रक्रिया अपि सम्पन्ना भविष्यति। सर्वेषु 145 सीबीएसई- संबद्ध- विद्यालयेषु नूतनसत्रात् पूर्णतया सीबीएसई-पद्धत्या अध्ययनम् आरभ्येत इति सरकारस्य लक्ष्यं वर्तते।

**अधिक-आवेदनानाम् अपेक्षा**

27 फरवरी पर्यन्तं आवेदन-प्रक्रिया प्रचलिता अस्ति। अतः आगामिषु दिनेषु अधिक-शिक्षकाः आवेदनं करिष्यन्ति इति अपेक्षा अस्ति। यदि आवेदनानि न्यूनानि भवन्ति तर्हि 2 फरवरी अनन्तरं विभागीय-अधिकारिभिः सह सभा आहूय आगामी-रणनीतिः निर्धार्यते इति शिक्षामन्त्री रोहित ठाकुर उक्तवान्।

**विषयानुसारं पद-संख्या**

प्रधानाचार्यः – 134
जीव-विज्ञान-प्राध्यापकः – 150
रसायन-विज्ञान-प्राध्यापकः – 161
भौतिक-विज्ञान-प्राध्यापकः – 161
गणित-प्राध्यापकः – 160
वाणिज्य-प्राध्यापकः – 288
अर्थशास्त्र-प्राध्यापकः – 167
अंग्ल-भाषा-प्राध्यापकः – 384
राजनीतिशास्त्र-प्राध्यापकः – 182
इतिहास-प्राध्यापकः – 182
हिन्दी-प्राध्यापकः – 182
भूगोल-प्राध्यापकः – 134
समाजशास्त्र-प्राध्यापकः – 134
संस्कृत-प्राध्यापकः – 134
संगीत-प्राध्यापकः – 134
सूचना-प्रौद्योगिकी-प्राध्यापकः – 134
शारीरिक-शिक्षा-प्राध्यापकः – 134
मनोविज्ञान-प्राध्यापकः – 134
डीपीई – 140
टीजीटी (कला) – 480
टीजीटी (मेडिकल) – 244
टीजीटी (नॉन-मेडिकल) – 244
शास्त्री – 221
भाषा-अध्यापकः – 239
चित्रकला-अध्यापकः – 179
शारीरिक-शिक्षा-शिक्षकः – 147
जेबीटी – 640
एवं 5623 पदानां पूर्तये आवेदनानि आमन्त्रितानि।

# हिमाचलप्रदेशस्य राजकीयसंस्कृतशिक्षकपरिषदः चम्बामण्डलस्य प्रतिनिधिमण्डलेन माननीयशिक्षामन्त्रिणा सह मेलनं कृतम्





हिमाचलप्रदेशस्य राजकीयसंस्कृतशिक्षकपरिषदः चम्बामण्डलस्य प्रतिनिधिमण्डलेन माननीयशिक्षामन्त्रिणा सह मेलनं कृत्वा संस्कृतशिक्षकानां दीर्घकालिकानां अभियाचनानां विषये ज्ञापनं समर्पितम्। ज्ञापने सीएण्डवी संस्कृतशिक्षकानां विशेषवेतनवृद्धिः, वरिष्ठता/पदोन्नतिः, वेतनविसंगतीनां तथा प्रशासनिक-शैक्षणिकसमस्यानां शीघ्रसमाधानाय याचना कृता। हिमाचलप्रदेशस्य राजकीयसंस्कृतशिक्षकपरिषदः चम्बामण्डलस्य प्रतिनिधिमण्डलस्य गोष्ठी आयोजिता, यस्यां संस्कृतशिक्षकैः सम्बद्धानां विविधानाम् अभियाचनानां विषये विस्तारेण चर्चा कृता। परिषदः अधिकारिभिः उक्तं यत् दीर्घकालात् प्रलम्बितानाम् अभियाचनानां कारणात् संस्कृतशिक्षकैः सह असन्तोषः व्याप्तः अस्ति, सर्वकारेण च अस्मिन् विषये शीघ्रं उचितप्रक्रिया करणीयाः।
गोष्ठ्यां मुख्यरूपेण एषा अभियाचना कृता यत् सीएण्डवी (संस्कृत) शिक्षकेभ्यः २० वर्षाणां सन्तोषजनकसेवापूर्त्यनन्तरं प्राप्यमाणाः द्वे विशेषवेतनवृद्धेः पुनर्स्थापना भवेत्। एतेन सहैव पात्रशिक्षकेभ्यः वरिष्ठवेतनमानस्य लाभः समयबद्धरीत्या दातव्यः इत्यपि बलं दत्तम्। परिषदा एषा अपि याचना कृता यत् टीजीटी संस्कृतशिक्षकेभ्यः २० वर्षाणां वरिष्ठतां सम्पूर्य टी.जी.टी वेतनमानं प्रदीयेत, येन अन्यविषयाणां शिक्षकैः सह तेभ्यः अपि समानाः अवसराः सम्मानं च प्राप्तुं शक्येत।एतदतिरिक्तं, जनपदस्तरीयेभ्यः (District Cadre) संस्कृतशिक्षकेभ्यः विषयविशेषस्य आधारेण पदोन्नतिं दातुम् अभियाचना कृता। परिषदः कथनम् अस्ति यत् पदोन्नतेः वर्तमानायां प्रक्रियायां संस्कृतशिक्षकैः सह पक्षपातः भवति, यस्य निराकरणम् आवश्यकम् अस्ति।प्रतिनिधिमण्डलेन स्पष्टीकृतं यत् यदि एतासु अभियाचनासु शीघ्रं सकारात्मकः निर्णयः न भविष्यति, तर्हि परिषद् चरणबद्धान्दोलनं कर्तुं विवशा भविष्यति। अन्ते परिषदा आशा प्रकटीकृता यत् सर्वकारः संस्कृतशिक्षायाः महत्त्वं ज्ञात्वा शिक्षकानां न्यायोचितानाम् अभियाचनानां विषये सहानुभूतिपूर्वकं विचारं करिष्यति।

## डा.वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

आकाशात् पतितायाः वर्षायाः जलं करतले अंजल्यां गृहीतुं शक्यम्, तैः पादप्रक्षालनमपि शक्यं भवेत्! परं यदि तज्जलं प्रणाले पतितं चेत् तस्य प्रतिष्ठा नष्टा एव यतः तेन पादप्रक्षालनं शक्यं न भवति। सः वर्षाजलबिन्दुः तप्ते पृष्ठभागे यदा पतति तदा सः बाष्पीभूत्वा अदृश्यः एव भवति। तस्य बिन्दुत्वं नश्यति। यदा सः जलबिन्दुः पद्मपत्रोपरि पतति तदा मौक्तिकमिव तेजः प्राप्नोति। परं स्वातिनक्षत्रे वर्तमाने स एव जलबिन्दु शुक्तिकायां पतित्वा साक्षात् मौक्तिकः एव भवति। इदमेव सारम्। एकः एव जलबिन्दुः साहचर्यभिन्नत्वेन संगगुणदोषतः उपयुक्ततां, प्रतिष्ठां, गौरवं, मृत्तिकासायुज्यं मूल्यहीनत्वं च प्राप्नोति।

# वार्तासंवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य एका विचित्रा वार्ता मया पठिता। एकेन कर्मकरेण अपहारार्घ-सङ्केतेन द्विलक्ष-मूल्यकाः उपानहः क्रीताः। अनन्तरं तेन त्यागपत्रं दत्तम् अस्ति।

**नन्दिनी-** सत्यम्, एषा प्रतारणा अतीव कष्टकरी। धनलोभः मानवान् भ्रष्टान् करोति। अपरपक्षे, मया अन्या वार्ता श्रुता। महतीम् कृत्रिम-मेधा-सङ्गोष्ठीम् प्रति तत्र 'मैक्रोसोफ्ट'-संस्थायाः पूर्व-कार्य-कर्त्रा स्वपितरौ नीतौ।

**काव्या-** तयोः पित्रोः सन्तोषः श्लाघनीयः अस्ति। स्वपुत्रस्य प्रगतिं दृष्ट्वा तौ प्रसन्नौ जातौ। इदानीं विदेशस्य वार्ता श्रूयताम्। चीन-देशे एका महती यात्रा एकेन वाहन-चालकेन कृता। तेन प्रथमवारं हिमं दृष्टम्।

**नन्दिनी-** तस्य चालकस्य उत्साहः अपूर्वः अस्ति। तस्य अनुभवः सर्वेभ्यः प्रेरणादायकः। अन्ते, गुरुग्रामस्य एका आवश्यकी वार्ता कथ्यते। तत्र रुग्णवाहिकया एकायाः वृद्धायाः मातामह्याः प्राणाः रक्षिताः। जालपुटक-प्रयोगात् शीघ्रं साहाय्यं प्राप्तम्।

**काव्या-** एतत् कार्यं तु अतिपुण्यकार्यम्। तन्त्रज्ञानेन यदा प्राणाः रक्ष्यन्ते, तदैव तस्य सार्थकता भवति। नन्दिनि, अद्य एतावदेव। पुनर्मेलिष्यावः।

# बदलावा री नेहरी




बदलावा री एहड़ी नेहरी आई
तिसे सब कुछ दित्या मुकाई
बतेहरा पैसा हुई गया सबीं गे
अन्य बाएं हुई गी सबीं री कमाई

तिसगे जे नी हुन्दी थी फुटी कौडी
सै अज्ज लखां च गलाया करदा
मानदारा रे पल्ले अई नी द्वानी
बेईमान करोड़ां कमाया करदा



हंडुये रा मुंह खुल्ला देखी कने
कुत्ते रा मन बी ललचायादा
पेटा री नी तिसजो चिंता
फ़टी जावे पांवें पर दब्बी कने खायादा

कच्चे घरां छडी कने पक्के घर बणायादे
माहनुआँ रे मन बी हुण पक्के ई बणी जायादे
बेईमानी भ्रष्टाचार नशाखोरी सब बदी गए
मानदारिया री बाटाँ छडी कने बेईमानियां रे रस्ते जायादे



स्लेट पट्टियां रा जमाना गुज़री गया
अज्ज टैब कम्प्यूटर लैपटॉप चलायादे
फाड़ां मारया करदे दब्बी कने
सच्चे बौहत घट सब झूठे झूठ गलायादे

कियां जांहगा अग्गे एह देश मेरा प्यारा
तांजे असें जाति पाती ते बाहर नी आयादे
इन्हें नेत्यां पटी त्या देशा रा छिक्का
कुर्सिया खातर एह असां तुसां जो लड़ायादे

**रवींद्र कुमार शर्मा घुमारवीं**
**जिला बिलासपुर हि प्र**

# निर्वाचनायोगस्य सम्मेलनम्




निर्वाचनआयोगः फरवरी-मासस्य २४ दिनाङ्के नवदिल्ल्यां राज्यनिर्वाचनआयुक्तैः सह एकस्य सम्मेलनस्य आयोजनं करिष्यति। मुख्यनिर्वाचनआयुक्तः ज्ञानेशकुमारः अस्मिन् सम्मेलने अध्यक्षतां करिष्यति।
सम्मेलने राज्यनिर्वाचनआयुक्ताः, तेषां विधिक-तकनीकी-विशेषज्ञाः तथा सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च मुख्यनिर्वाचनधिकारिणः भागं ग्रहीष्यन्ति। अस्य सम्मेलनस्य मुख्योद्देश्यं निर्वाचनआयोगस्य राज्यनिर्वाचनआयुक्तैः सह कार्यपद्धतौ समन्वयस्य (तालमेलस्य) संवर्धनं वर्तते।
सम्मेलने प्रौद्योगिकी, ई.वी.एम. (EVM) तथा मतदाता-सूचीनां परस्परं साझाकरणस्य विषये चर्चा भविष्यति। आयोगानुसारं, एतादृशं सम्मेलनं सप्तविंशति (२७) वर्षोत्तरं प्रचलति।

# न्यायमूर्ति-सूर्यकान्तस्य दीक्षान्तभाषणम् : "सहयोगः धैर्यं च सफलतायाः आधारस्तम्भौ"



भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः रायपुरस्थ-हिदायतुल्ला-राष्ट्रिय-विधि-विश्वविद्यालयस्य (HNLU) दीक्षान्तसमारोहे मुख्यतिथिरूपेण सम्मिलितः अभवत्।समारोहं सम्बोधयन् मुख्यन्यायाधीशः उक्तवान् यत् विधि-क्षेत्रे दीर्घकालिताय सफलजीवनाय (Career) "सहयोगः" तथा "धैर्यम्" इति द्वौ अत्यन्तं महत्त्वपूर्णौ आधारस्तम्भौ स्तः। सः अवदत् यत् विधि-क्षेत्रं न काचित् अल्पा धावनप्रतियोगिता (Sprint), अपितु एषा एका 'दीर्घदूरी-धावनप्रतियोगिता' (Marathon) अस्ति, यत्र समयेन सह अनुभवेन च मनुष्यस्य मूल्यं वर्धते।अस्मिन् अवसरे षट् (६) छात्रेभ्यः पी.एच.डी. (PhD), अष्टाशीति (८८) छात्रेभ्यः एल.एल.एम. (LL.M.) तथा अष्टचत्वारिंशत्-अधिक-शतं (१४८) छात्रेभ्यः बी.ए. एल.एल.बी. (ऑनर्स) इत्यस्य उपाधयः प्रदत्ताः। शैक्षणिक-उत्कृष्टतायै दश स्नातक-छात्रेभ्यः त्रयः स्नातकोत्तर-छात्रेभ्यः च षट्त्रिंशत् (३६) सुवर्णपदकानि समर्पितानि।

# अभिनव-भारती-वारङ्गा-परिसरे संस्कृति-महोत्सवस्य 'रामचरितमानस-पारायणस्य' च शुभारम्भः






**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे नागपुरम्।**

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य 'अभिनव-भारती-अन्ताराष्ट्रीय-परिसरे' (वारङ्गा) २२ फरवरीतः २८ फरवरी २०२६ दिनाङ्कपर्यन्तं 'संस्कृति-महोत्सवः' आयोज्यते। अस्य महोत्सवस्य शुभारम्भः रविवासरे 'श्रीरामचरितमानस-पारायण-कथा-सप्ताहस्य' मङ्गलाचरणेन अभवत्। अस्मिन् अवसरे एका भव्या पारम्परिकी शोभायात्रा निष्कासिता, यस्यां भगवतः श्रीरामस्य, लक्ष्मणस्य, सीतायाः, हनुमतः च प्रतिमानां विधिपूर्वकं प्राणप्रतिष्ठां कृत्वा पारायणस्य आरम्भः कृतः। अस्मिन् सप्ताहे महाकवि-सन्त-तुलसीदास-रचितस्य रामचरितमानस-ग्रन्थस्य पारायणं भविष्यति। अस्य कार्यक्रमस्य मुख्यं वैशिष्ट्यं वर्तते यत्— प्राचीन-भारतीय-विज्ञान-तथा-मानव्यशास्त्र-सङ्कायस्य अधिष्ठाता एवं परिसर-सञ्चालकः प्रो. कृष्णकुमार-पाण्डेय-महोदयः मानसस्य चयनितानां दोहानां चौपाईनां च उपरि आध्यात्मिकं वैज्ञानिकं च प्रवचनं दास्यति। विश्वविद्यालयस्य माननीय-कुलगुरूणां डॉ. अतुल-वैद्य-महोदयानां मार्गदर्शने एषः कार्यक्रमः सम्पन्नः भवति। महोत्सवस्य संयोजिका डॉ. रेणुका-करन्दीकर महोदया जिज्ञासून् भक्तजनान् च अधिकाधिकसंख्यायां उपस्थिताः भूत्वा अस्य ज्ञानयज्ञस्य लाभं ग्रहीतुं निवेदितवती।

## राम-कृष्ण परमहंस स्मृति संस्कृत सम्भाषण - प्रतियोगितायाः परिणामः



### प्रथमपुरस्कारः

डॉ दीप्ति कुमारी , संस्कृत विभागाध्यक्ष, एम.एल.टी.महविद्यालयः ,सहरसा बिहारः।
गरिमा मिश्रा संस्कृत शिक्षिका, श्री महंत हरिहर दास उच्च माध्यमिक विद्यालय, पटना, बिहारः ।

### द्वितीयपुरस्कारः

डॉ विश्वजीत रुद्र पालः - सिलचर, असमः।
डॉ रागनी कुमारी - संस्कृत शिक्षिका, पटना ,बिहारः।

### तृतीयपुरस्कारः

वन्दना पटेरिया - अंग्रेजी शिक्षिका, सागर मध्यप्रदेशः।
तारा विश्वकर्मा - भोपाल, मध्यप्रदेशः।
मुरलीधर शुक्लः - संस्कृत शिक्षकः, बांकीपुर उच्चतर माध्यमिक विद्यालय, पटना, बिहार।

### विशेषपुरस्कारः

बीजेन्द्र सिंहः-संस्कृत शोध छात्रः, दिल्लीविश्वविद्यालयः।
हर्षिता कुमारी - विज्ञान शिक्षिका, पटना ,बिहारः।
विकासः - स्नातक छात्र पटना विश्वविद्यालय, बिहारः।
डॉ मुकेश पण्डितः- संस्कृत शिक्षकः, उच्चतर माध्यमिक विद्यालय,तिहरवा बिहारः।

### निर्णायकमण्डलस्य सदस्याः

प्रो०रागिनी वर्मा-राष्ट्रीय संयोजिका, आधुनिको भव संस्कृतं वद अभियानम् डॉ लीना चौहानः, राष्ट्रीयोपाध्यक्षा, आधुनिको भव संस्कृतं वद अभियानम् डॉ नीरा कुमारी, राष्ट्रीय कार्यकारिणी सदस्या, आधुनिको भव संस्कृतं वद अभियानम्
**डॉ मुकेश कुमार ओझा,राष्ट्रीय अध्यक्षः ,आधुनिको भव संस्कृतं वद अभियानम्**

## ग्रामीणडाकसेवकाः राष्ट्रस्य आधारस्तम्भाः : ज्योतिरादित्यादित्यसिन्धिया



केन्द्रीयसंचारमन्त्री ज्योतिरादित्यसिन्धिया ग्रामीणडाकसेवकान् 'ग्रामीणभारतस्य कशेरुका' (रीढ़) इति कथयन् तेषां प्रशंसां कृतवान्। सः उक्तवान् यत् देशस्य षट्-लक्ष-त्रिंशत्-सहस्र (६,३०,०००) ग्रामेषु अन्तिमं सोपानं यावत् सम्पर्कं सुनिश्चितं कर्तुं डाकसेवकानां महत्त्वपूर्णा भूमिका अस्ति। आन्ध्रप्रदेशस्य गुण्टूरनगरे आयोजिते 'ग्रामीणडाकसेवक-सम्मेलने' सम्बोधनं कुर्वन् श्रीसिन्धिया महोदयः अवदत् यत्— ग्रामीणडाकसेवकाः आतपे, वृष्टौ, चक्रवाते, अपि च कश्मीरस्य हिमच्छादितेषु क्षेत्रेषु अपि देशस्य सेवां कुर्वन्ति। सः डाकसेवकान् "भारतमातुः देदीप्यमान-रत्नेषु अन्यतमम्" इति वर्णितवान्, तेषां भूमिकायाः तुलना च मानवशरीरे जीवनरक्षक-रक्तप्रवाहेण सह कृता। श्रीसिन्धिया महोदयः सूचितवान् यत् प्रायः लक्षत्रयं (३,००,०००) ग्रामीणडाकसेवकाः देशे सेवां प्रददति, ते सर्वकारस्य नागरिकाणां च मध्ये एका महत्त्वपूर्णा सेतुः वर्तन्ते। 'वित्तीय-समावेशन' (Financial Inclusion) क्षेत्रे तेषां योगदानं प्रकाशयन् केन्द्रीयमन्त्री उक्तवान् यत्—तेषाम् एव प्रयासैः 'इण्डिया पोस्ट' ३८ कोटि-डाक-खातानि उद्घाटयितुं समर्थम् अभवत्, २२ लक्ष-कोटि-रूप्यकाणां राशिं च एकत्रितवान्। अस्मिन् अवसरे आन्ध्रप्रदेश-डाक-मण्डले (Postal Circle) कार्यरताः ग्रामीणडाकसेवकाः सम्मानिताः अभवन्। कार्यक्रमे आन्ध्रप्रदेशस्य मुख्यमन्त्री एन. चन्द्रबाबू नायडू, केन्द्रीयसंचार-राज्यमन्त्री डॉ. पी. चन्द्रशेखरः, जनप्रतिनिधयः तथा अधिकारिणः च उपस्थिताः आसन्।

## संतावन्ता इत्यनयोः विमानयात्रा



(संता प्रथमवारं विमानेन यात्रां करोति। सः वातायन-पार्श्वे (Window seat) उपविष्टवान् अस्ति।)

**संताः** (वातायनतः अधः पश्यन्, आश्चर्येण) अरे वन्ता! पश्य, अधः जनाः पिपीलिकाः (चींटियों) इव दृश्यन्ते!

**वन्ताः** (शान्तभावेन) अरे मूर्ख! तानि पिपीलिकाः एव सन्ति। विमानं तु अधुना अपि भूमौ (Ground) एव अस्ति, उड्डयनं (Take-off) तु आरब्धम् एव नास्ति!